## सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः । (६१/७४०)

सत् महत् परम उत्तम उत्कृष्ट इत्येते पूज्यमानैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । पूज्यमानैः इति वचनात् [1]पूजावचनाः सदादयो विज्ञायन्ते । सत्पुरुषः । महापुरुषः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः । पूज्यमानैः इति किम् ? [2]उत्कृष्टो गौः कदर्मात् ॥

## वृन्दारकनागकुञ्जरैः पूज्यमानम् । (६२/७४१)

वृन्दारक नाग कुञ्जर इत्येतैः सह पूज्यमानवाचि [3]सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति । [4]पूज्यमानम् इति वचनात् [5]पूजावचना वृन्दारकादयो गृह्यन्ते । गोवृन्दारकः । अश्ववृन्दारकः । गोनागः । अश्वनागः । गोकुञ्जरः । [6]अश्वकुञ्जरः । पूज्यमानम् इति किम् ? [7]सुषीमो नागः ॥

## कतरकतमौ जातिपरिप्रश्ने । (६३/७४२)

कतरकतमौ[8] जातिपरिप्रश्ने वर्तमानौ समर्थेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति । [9]कतरकठः । कतरकालापः । कतमकठः । कतमकालापः ।

ननु[10] कतमशब्दस्तावज् जातिपरिप्रश्न एव [11]व्युत्पादितः, कतरशब्दोऽपि साहचर्यात् तदर्थवृत्तिरेव ग्रहीष्यते, किं जातिपरिप्रश्नग्रहणेन ? [12]एवं तर्ह्येतज् ज्ञापयति कतमशब्दोऽन्यत्रापि वर्तते इति । तथा च प्रत्युदाहरणम्– कतरो भवतोर्देवदत्तः, कतमो भवतां देवदत्तः[13] ॥

## किं क्षेपे । (६४/७४३)

[14]किम् इत्येतत् क्षेपे गम्यमाने सुपा सह समस्यते तत्पुरुषश्च समासो भवति । किंराजा, यो न रक्षति । किंसखा, योऽभिद्रुह्यति । किंगौः, यो न वहति । 'किमः क्षेपे' (५.४.७०/९५५) इति समासान्तो न भवति । क्षेपे इति किम् ? को राजा [15]पाटलिपुत्रे ॥

## पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः । (६५/७४४)

उभयव्यञ्जना पोटा इत्यभिधीयते[16] । गृष्टिरेकवारप्रसूता । धेनुः प्रत्यग्र[17]प्रसूता । वशा वन्ध्या । वेहद् [18]गर्भपातिनी । बष्कयणी तरुणवत्सा । पोटादिभिः सह जातिवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति । [19]इभपोटा । इभयुवतिः । [20]अग्निस्तोकः । [21]उदश्वित्कतिपयम् । गोगृष्टिः । गोधेनुः । गोवशा । गोवेहत् । गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः । जातिः इति किम् ? देवदत्तः प्रवक्ता । धूर्तग्रहणम्[22]कुत्सार्थम् ॥

---

1. पूजाशब्दाः फ, पूजाशब्दाः एव क, पूजनवचनाः ह. 2. उत्कृष्टा क. 3. सुबन्तं नास्ति ह. 4. पूज्यमानैः ग. 5. पूजाशब्दाः क. फ, पूजावाचिनः एव ग, पूजावचना एव ब. ड. 6. नास्ति फ. 7. सुषमः फ, सुषिमः क, सुषुमो नागः ग, सुश्वीमो ब. 8. शब्दौ इत्यधिकम् फ. 9. कतरः कठः, कतरः कालापः, कतमः कठः, कतमः कालापः इ, कतरकलापः, कतमकलापः ड. 10. च इत्यधिकम् फ. 11. व्युत्पाद्यते ग. 12. एवं तर्हि नास्ति क. इ. फ. 13. इति इत्यधिकम् क. इ. ग. 14. किं शब्दः क. 15. पाटलिपुत्रस्य ग. 16. युवतिर्नवयौवना स्त्री, स्तोकमल्पपर्यायः, कतिपयं च इत्यधिकम् अ. 17. °प्रसवा फ. 18. गर्भघातिनी क. ड, गर्भघ्नी ब. 19. इभ्यपोटा ड. फ, इभ्ययुवतिः ड. फ. क. 20. अग्निस्तोकम् क. फ. 21. °कतिपयः क. ह. 22. अकुत्सनार्थं क. इ.